रस्य एव सत् उपचारात् प्रकृतिस्थः इत्यनेघराकाशे मतिरिवास्मिन् प्रकृतिस्थत्वमारोप्यते १० एतेनाव्यक्तांतकसेन प्रकृतिर्लोहतुल्या ११

उभयोरपि तुल्यत्वेन चेतनत्वं मन्वानः प्रकृतेरचेतनत्वमाक्षिपति अनादीति अमूर्त्तत्वं अदृश्यत्वं तच्च निमात्रानुमेयेषु प्रधाने पुरुषे च तुल्यमत एतयोरनादिनिधनत्वं तत्र अप्रकंप्यगुणागुणत्वं च गुणाः संगित्वादिर्दोषः गुणोऽहंमत्वादिः अयमनयोः स्वभावावित्यर्थः १२ अग्राह्यत्वाच्चैतयोर्वैलक्षण्येन निश्चेतुं शक्यमित्याशंक्याह अग्राह्याविति १४ एवं पुंसश्चेतनत्वेपि अस्तित्वं कथं बद्धमोक्ष्ययोरपि पुंप्रकृत्योर्युगपन्नाशावश्यंभावात् अस्तित्वे चाकेवलत्वं प्रकृत्यावियुक्तत्वं कथं पुंसो विमुक्तेनप

जनक उवाच अनादिनिधनावेतावुभावेव महामते अमूर्त्तिमंतावचलावप्रकंप्यगुणागुणौ १२ अग्राह्यावृषिशार्दूल कथमेको ह्यचेतनः चेतनावांस्तथा चैकः क्षेत्रज्ञ इति भाषितः १३ त्वं हि विप्रेन्द्र कार्त्स्न्येन मोक्षधर्ममुपाससे साकल्यं मोक्षधर्मस्य श्रोतुमिच्छामि तत्त्वतः १४ अस्तित्वं केवलत्वं च विनाभावं तथैव च दैवतानि च मे ब्रूहि देहं यान्याश्रितानि वै १५

कृतेर्विनाशेन च तदसंभवात् ननु तर्हि मन्ये आत्ममनसोरिव पुंप्रकृत्योर्विषयभोगेऽपि फलोपहितो विलक्षणः संयोगोऽस्तु स च कार्यविकारहेतुरिति तद्भावान्मोक्षे पुंसः केवलत्वं पुनर्न इत्याशंक्याह विनाभावमिति निरवयवे पुंसि च व्याप्यवर्त्तिनः संयोगस्यैवासंभवात् अभ्युपगमेऽपि नित्यत्वादिवत्स्वदेशभेदाभावेन तद्वैलक्षण्यस्यानुगमासंभवाच्च दृष्टान्तिके च तत्स्वतः संयोगासिद्धेः दृश्यमानस्य संयोगस्य मिथ्यात्वं मतं तेनाविनाभावो न संभवति मिथ्यात्वं च प्रत्यक्षादिप्रमाणविरुद्धमित्याशयः १५

उत्क्रामिणमुत्क्रान्तस्य विपद्यतः म्रियमाणस्य १८ अरिष्टानि मृत्युसूचकानि १९ यतो यदपूर्वं तत्त्वानि इयं कथमेको ह्यचेतन इति चेन्नाचेतनविभाग
मात्रेण तत्त्वे भावेपि किं चेतनोऽचेतनो वा संमतो नांशः न गराद्यपश्यतं गात नाद्यः दृश्यमानस्य दृश्यस्य विभागस्य दुःखद्भवत्वात् अथ पद्याम्

न यैवोत्क्रामिणः स्थानं देहिनो वै विपद्यतः कालेन यद्धि प्राप्नोति स्थानं तन्मे ब्रवीहि मे १८ सांख्यज्ञानं च तत्त्वेन
यथा गतं तथैव च अरिष्टानि च तत्त्वानि वक्तुमर्हसि सत्तम विदितं सर्वमेतत्ते पाणावामलकं यथा १९ शान्तो मोक्षध
र्मे युधिष्ठिर जनकसंवादे याज्ञवल्क्य उवाच न शक्यो निर्गुणस्तात गुणीकर्तुं विशांपते गुणवांश्चाप्यगुण
वान् यथा तत्त्वं निबोध मे १ गुणैर्हि गुणवानेव निर्गुणश्चागुणस्तथा प्राहुरेवं महात्मानो मुनयस्तत्त्वदर्शिनः २
गुणस्वभावस्त्वव्यक्तो गुणान्नैवातिवर्तते उपयुंक्ते च तानेव स चैवाज्ञः स्वभावतः ३ अव्यक्तस्तु न जानीते पुरु
षोज्ञः स्वभावतः न मत्तः परमोस्तीति नित्यमेवाभिमन्यते ४

चंदनावनि १

त्वयं चंदनाचंदनावेव भवतः एवमनादिसंयोगाच्चेतनाचेतनावर्पितौ चेतनाचेव भवत इति ब्रूयेत् तदपि न स्वभावस्यापरिहार्यत्वादित्याह न श
क्य इति २ स्वभावतः अज्ञोपि आरोपितेन ज्ञत्वेन उपयुंक्ते तान् ३ नहि मुख्यो भोक्ता किंपुरुष इत्याशंक्य योने साह अव्यक्त इति अव्यक्तः अ
ज्ञः दृगात्मानं न जानीते न भुंक्ते च यत मत्त आत्मनो नं भोग्यमर्थं न पश्यति अभिमन्यत इति मुख्याना भिप्राये रागोक्तं ४

अचेतनभोक्तृत्वाभोक्तृत्वं चेत्स्वरूपेण एतत् अव्यक्तं प्रधानं स्वभावतः अचेतनमपि तदव्यक्तं ततो भोक्तुः सकाशात् तथा विपरीतं अभोक्तृ न स्यात् कथं तर्हि भोक्तृत्वमत आह अक्षरत्वात् क्षरत्वाच्चेति क्षरणं क्षरत्वं तस्मात् चिदचिदात्मकत्वात् स भोक्तृत्वं ननु का शंका व्यवहारेण नाशमात्रमेतदर्थः नित्यत्वाच्च भोग्यभोक्तृविभागस्तन कश्चिद्दोषः इत्यर्थः ५ ननु जतुकाष्ठयोरिव तुल्यस्वभावयोः संश्लेषादृष्टः ननु काष्ठाकाशयोरिति विदुषिताः

अनेन कारणेनैतदव्यक्तं स्यादचेतनं । नित्यत्वाच्चाक्षरत्वाच्च क्षरत्वाच्च तथा यथा ५ यदाज्ञानेन कुर्वीत गुणसर्गं पुनः पुनः । यदात्मानं न जानीते तदात्मापि न मुच्यते ६ कर्तृत्वाच्चापि पर्णानां सर्गधर्मा तथोच्यते कर्तृत्वाच्चापि योगानां योगधर्मा तथोच्यते ७ कर्तृत्वात्प्रकृतीनां च तथा प्रकृतिधर्मिता ८ कर्तृत्वाच्चापि बीजानां बीजधर्मा तथोच्यते गुणानां प्रसवत्वाच्च प्रलयत्वात्तथैव च ९

संबंधो दुर्निरूप इत्याशंक्याह यदेति अज्ञानेनेतिच्छेदः गुणसर्गं गुणसंसर्गं चाघोपदाशब्दो यस्मादर्थे यदिति पाठः स्वच्छः यस्मादाध्यासिकोऽयमज्ञानकृत आत्मनि गुणसंसर्गः तस्मात् यावदात्मानं असंगं न जानाति तावन्न मुच्यत इत्यर्थः ६ अत्र निदर्शनमाह कर्तृत्वादित्यादिना प्राकृतेन महदादितत्वकर्तृत्वेनायमपि कर्तृायतोऽप्यवतानानमुच्यत इत्यर्थः ७ प्रकृतीनां प्रजानां ८ बीजानां स्थावराणां गुणानां क्रमशमादीनां ९

नन्वेवंविधस्य कथं केवलत्वं स्यादित्यत आह उपेक्षितारमिति उपसमीपे स्थित्वा ईक्षते इत्युपेक्षः साक्षी न हि साक्ष्येण साक्षी विक्रियते घटेनालोकवत् केवल
त्वमस्य युज्यते यथोक्तं नैनं साहंक्रियया दुःखी साक्षिना कापि कारिणा धीविक्रियासहस्राणां साक्ष्यहमविक्रिय इति ननु साक्षिनमत्त्वभावाभाति हृत्वेदनी
यं दुःखं त्वपरिहार्यमित्याशंक्याह अनमतारमिति नास्य नोस्मादिति न नमत्वान् दुःखी दुःखरूपेणाप्रसत्वान्नात्मनि तत्संबंधः कदाचिदस्तीत्यर्थः कुतस्तर्हि
दुःखाभिमानमतस्त्वाह अभिमानादिति परादिग्सत्त्वमात्मीयममतेन दानतः दुःखेन दुःखी भवति नाम यथा एवं धीतादात्म्यात् धीदुःखेनैवास्य दुःखीत्वं धियस्त्यागेन तु

उपेक्षितारनमतारदभिमानावृकेवलं ममंते पत्ययं सिद्धा त्वात्मना गतज्वराः १० अनित्यं नित्यमव्यक्तं व्यक्तमेतद्दि शु
श्रुम १० अव्यक्तैकत्वमित्याहुर्नानात्वं पुरुषास्तथा सर्वभूतदयावंतः केवलं ज्ञानमास्थिताः ११ अन्यः स पुरुषो
व्यक्तस्त्वध्रुवो ध्रुवसंज्ञकः यथा मुंज इषीकाणां तथैवैतद्धि जायते २२

केवलत्वं निःसंसिद्धमिति एतेन व्याहितं केवलत्वं विना भावानामाक्षेपः परिहृतो ज्ञेयः १० अनित्यमिति अनित्यं परिणामि नित्यमपरिणामि अव्यक्तं कारणं
व्यक्तं कार्यमिति १० तत्र मतांतरमाह अव्यक्तस्य एकत्वं पुरुषाः पक्षार्थे प्रथमा पुरुषाणां नानात्वमित्याहुर्निरीश्वरसांख्याः ताविशिनष्टि सर्वेत्यर्द्धेन ११
पुरुषस्याभेदमनेकदृष्टांतेनैक्यमाह अन्यः इत्यादिना अव्यक्त इति छेदः इषीकाणां वा हेतः यथा मुंज एवं तु तेन सा अव्यक्ताद्यादि इत्यर्थः कोतिशत्रुंगुरुमाव तु
रूपोऽन्य आत्मा स ह राजन्नानात्वं ह्रस्वोपेतश्चिविशः तेनाक्षुगोण्यत्वहे मुंजादिव इषीकां धैर्येण तं विषाक्षुक्रमममननमिति २

२४ तत्त्वामृतात्त्वविशेषः २० चत्वारिंशदधिकशततमः सांख्यज्ञानमिति १ एकैकत्वयोः शमाद्यनुष्ठानं ययोस्तौ तत्त्वनिधनौ मृत्युनाशकौ २ पृथगिति तत्त्वमौ

अमत्स्यमशकं विद्यात् मशकोदुंबरं तथा न चोदुंबरसंयोगे मशकस्तत्र लिप्यते १३ अन्य एव तथा मत्स्यस्तदन्यदुदकं स्मृतं न चोद
कस्य स्पर्शेन मत्स्यो लिप्यति सर्वशः १४ अन्यो ह्यग्निरुखाप्यन्या नित्यमेवमवैहि भोः न चोपलिप्यते सोग्निरुखासंस्पर्शनेन वै १५
पुष्करं त्वन्यदेवात्र तथान्यदुदकं स्मृतं न चोदकस्य स्पर्शेन लिप्यते तत्र पुष्करं १६ एतेषां सहवासं च निवासं चैव नित्यशः याथातथ्ये
न पश्यंति न नित्यं प्राकृता जनाः १७ ये त्वन्यथैव पश्यंति न सम्यक्तेषु दर्शनं ते व्यक्तं निरयं घोरं प्रविशंति पुनः पुनः १८ सांख्य
दर्शनमेतत्ते परिसंख्यानमुत्तमं एवं हि परिसंख्याय सांख्याः केवलतां गताः १९ ये त्वन्ये तत्त्वकुशलास्तेषामेतन्निदर्शनं अ
तः परं प्रवक्ष्यामि योगानामनुदर्शनं २० शांतिमोक्षधर्मेषु याज्ञवल्क्यजनकसंवादे याज्ञवल्क्य उवाच सांख्यज्ञानं मया प्रोक्तं
योगज्ञानं निबोध मे यथाश्रुतं यथादृष्टं तत्त्वेन नृपसत्तम १ नास्ति सांख्यसमं ज्ञानं नास्ति योगसमं बलं तावुभावेकचर्यौ तु २
उभावनिधनौ स्मृतौ २ पृथक् पृथक् च पश्यंति येऽल्पबुद्धिरता नराः वयं तु राजन् पश्याम एकमेव तु निश्चयात् ३ यदेव योगाः ष्ट

इति हितोपांतमनुक्रम्यते २ ४ यदेव योगाः पश्यंति तत्सांख्यैरपि दृश्यते एकं सांख्यं च योगं च यः पश्यति स तत्त्व

त्क्रमणकाले देहिनं रोदयंतीति रुद्राः प्राणाइंद्रियाणि चेतांसि वा प्रधानभूतान्यांतरवन्तानि येषु तान् तथा वक्तृत्वं च्छर्दनविधारणाभ्यां गमागमासविषयवतीवा
पर्वत्रि कृत्स्नचात्ममनसः स्थितिनिबंधिनी प्रच्छर्दनं रेचकः विधारणं पूरकपूर्वकः कुंभकः तथा नासिकाग्रे धारयतो गंधसंवित् जिह्वाग्रे रससंवित् तालु निरूप
संवित् जिह्वामध्ये स्पर्शसंवित् जिह्वामूले शब्दसंवित् तत्तत् वायुधारणायाः फलं विचरंति दिशो दश अनुक्रमे विचरत्वं मापुर्वंतीत्यर्थः ५ अष्टगुणेनउपेष्टक्रमपेन

स्थूलध्यानात्परं विद्धि योगानरिंदम तेनैव चाथ देहेन विचरंति दिशो दश ५ यावद्भूवलयस्थानं सूक्ष्मेणाष्टगुणेन ह
योगेन लोकान्विचरन्सुखं सन्मसचानघ ६ वेदेषु चाष्टगुणितं योगमाहुर्मनीषिणः सूक्ष्ममष्टगुणं प्राहुर्नेतरं नृपसत्तम
नम ७ द्विगुणं योगकर्मं तु योगानां प्राहुरुत्तमं सगुणं निर्गुणं चैव यथाशास्त्रनिदर्शनं ८

सूक्ष्मशरीरेण सम्यक्संन्यासं च देहस्य सुखं यथेष्टं कुरु एतद्यदृष्टं फलं मोक्षांतेषु योगधर्मेषु अष्टो मायास्तन्नाथे युक्तं न तु योगिनामवश्यपारदर्शनीयं ६ वेदेष्विति अ
ष्टगुणितं अष्टभिर्गुणैर्युक्तं नित्ययोगमत्यर्थीयः अष्टगुणं अष्टांगं प्राणायामः प्रत्याहारो ध्यानं धारणा तर्कः समाधिः षडंगा इति मैत्रायणीयोपनिष
दादिषु षडंगानुक्तानि तथापि यमनियमाभ्यां क्रमतं तरोक्तभ्यासहाष्टसंख्या बोध्या अत्र सूक्ष्ममित्युक्तेः पूर्वस्य स्थूलत्वं मंदाधिकारित्वं चोक्तं नेतरो यो
गसिद्धिरूपस्थितासुरोपान्तयनं ७ द्विगुणं द्विप्रकारं तदेवाह सगुणं सबीजं निर्गुणं निर्बीजं ८

सगुणमाह धारणमिति प्राणायामः प्राणनिग्रहपूर्वकं मनसः षोडशस्वाधारेषु धारणं तेन शिवयोगे प्रोक्ताः षोडशाधारान्कथयामि विशेषतः इत्यादिना पादांगुष्ठगुल्फलिंगमूलस्वमूत्रयोनेत्राधाराः षोडश शैलिसंज्ञाः यद्वा याज्ञवल्क्योक्ताः पादांगुष्ठात्कृष्टदशस्थानान्यस्थानेन समाकृष्य तालादिना दर्शिता यास्ताः अथवा याज्ञवल्क्योक्ताः एवं पंचभूतधारणा तेषां पादादिजानुपर्यंतं पृथिवीस्थानमुच्यते आजानोः पायुपर्यंतमपांस्थानं प्रकीर्तितं आपायोर्हृदयांतं वह्निस्थानं तदुच्यते हृन्मध्यात्तु भ्रुवोर्मध्यं यावद्वायुकुलं भवेत् आभ्रूमध्यात्तु मूर्द्धांतमाकाशस्थानमुच्यते पृथिव्यां धारयेत्तत्र ब्रह्माणं परमेष्ठिनं विष्णुमग्नौ तनेरुद्रमीश्वरं वायुमंडले सदाशिवं तथा व्योम्नि धारयेत्तु समाहितः पृथिव्यां वायुमारोप्य लकारेण समन्वितं ध्यायंश्चतुर्मुखाकारं ब्रह्माणं सृष्टिकारणं धारयेत्पंच घटिकाः पृथिवीजयमाप्नुयात् वारुणे वायुमारोप्य वकारेण समन्वितं स्मरन्नारायणं देवं चतुर्बाहुं स्मितिस्मितं शुद्धस्फटिकसंकाशं पीतवाससमच्युतम् धारयेत्पंचघटिकाः

धारणैव मनसः प्राणायामश्च पार्थिव एकाग्रता च मनसः प्राणायामस्तथैव च ९

सर्वरोगैः प्रमुच्यते वह्नौ चानिलमारोप्य रेफाक्षरसमन्वितं त्र्यक्षं वरदं रुद्रं तरुणादित्यसंनिभं भस्मोद्धूलितसर्वांगं सुप्रसन्नमनुस्मरन् धारयेत्पंच घटिकाः पंचवह्निनासौ न दह्यते मारुतं मरुतां स्थाने यकारेण समन्वितं धारयेत्पंचघटिका वायुवद्व्योमगो भवेत् आकाशे वायुमारोप्य हकारोपरि शंकरं बिंदुरूपं महादेवं सर्वलोकैककारणं चित्तेन चिंतयेत्तत्रस्थं मुहूर्त्तमपि धारयेत् स एव मुक्तः स्यात्कृत्स्नां त्रिकेष्वपि विशिष्यते इति निर्गुणमाह एकाग्रतेति एकमेव ध्यातृध्येयध्यानविभागशून्यं वस्त्वग्रं यस्य तदेकाग्रं निर्वृत्तिकं तस्य भावस्तत्ता मनसः बुद्धेः च प्राणा इंद्रियाणि मनस्तानि तेषां आयामो निग्रहः प्राणायामः तथा च श्रुतिः यदा पंचावतिष्ठंते ज्ञानानि मनसा सह बुद्धिश्च न विचेष्टति तामाहुः परमां गतिमिति ९

सगुणनिर्गुणयोरंगांगिभावमाह। सगुणेन प्राणायामो हीति निर्गुणं निर्ह्रीकं धारयेत् स्थिरं कुर्यादित्यर्थः यद्यहः स्पृशति अहः स्पृशमाने मोचनस्थाने यदि वायुं मुंचन्न भवति तत्
हि वाताधिक्यं भवत्येव अयमर्थः शकारादीनां मूलाधारादीनां च देवतानां धिकं ध्यापनं पापवायुधारणं करोतीति स्मृतिः सिद्धान्ते ध्यानवर्जितं तु अमत्सत्त्वचस्पं वाध्यत
इति यथोक्तं पवनयोगसंग्रहे प्राणायामेन युक्तेन सर्वरोगक्षयो भवेत् अयुक्ताभ्यासयोगेन महारोगसमुद्भव इति युक्तेन देवताध्यानयुक्तेन देवतास्तवयाद्गुण

प्राणायामो हि सगुणो निर्गुणं धारयेन्मनः यद्यहः स्पृशति मुंचन्वै प्राणा
न् मैथिलसत्तम वाताधिक्यं भवत्येव न तस्मात्तत्समाचरेत् १०

ध्येयोक्ताः नीलोत्पलदलश्यामं नाभिमध्ये व्यवस्थितं चतुर्भुजं महात्मानं पूरकेण विचिंतयेत् कुंभके च हृदिस्थाने ध्यायेत्तु कमलासनं ब्रह्माणं रक्तगौरांगं
चतुर्वक्त्रं पितामहं रेचकेनेश्वरं विद्याल्ललाटस्थं महेश्वरं शुद्धस्फटिकसंकाशं निर्मलं पापनाशनमित्यादि १०

निशायाइति द्वादश पूर्वोक्ताः द्वाविंशति चोदना एवात्र संक्षेपेण द्वादश यथांतरे गणिताः यथोक्तं शिवयोगे मूलाधारे त्रिधावर्त्ते ब्रह्मचक्रं भगोपमं तत्कंदे अग्निभं
ध्यायेदधः शक्तिमभीष्टदं १ स्वाधिष्ठानं ततश्चक्रं तत्र चानुर्दलांबुजं तदेवोड्डीयनं ध्यायेत्सर्वमाभिमुखं शिवं २ पंचावर्त्तं नाभिचक्रं मेघाकारं तडित्प्रभं
तत्र कुंडलिनीं ध्यायेदधः शक्तिं सुसिद्धिदां ३ अथो पुत्वाष्टपत्राब्जयुक्तं हृच्चक्रमिष्टदं तन्मध्यके त्रिकोणं ध्यायेज्ज्योतिलिंगाकृतिं विभां ४ पंचमं कंठचक्रं च तत्
त्रांगुलं चतुरस्रकं इडापिंगलयोर्ध्यायेत्सुषुम्नां मध्यसंस्थितां ५ षष्ठं च घंटिकालिंगमूलं तत्राज्ञानंदनकं ध्यायेत्तु दशमद्वारं तत्र सूक्ष्मं सुसिद्धये ६ भ्रूचक्रं तत्सप्तं

निशायाः प्रथमे यामे चोदना द्वादश स्मृताः मध्ये तु प्रासरे या
मे द्वादशैव तु चोदनाः ११

निकनालकं दंतबाकुपदं ध्यायेद्दिव्यशिखाकारं तन्मध्ये सानलोचनं ७ ब्रह्मरंध्रे ष्टपंचकं निर्वाणाख्यं सुसूक्ष्मदं तत्र जालंधरं ध्यायेत्सूक्ष्मं मोक्षप्रदं ततः ८
आकाशबीजं नवमं प्रशस्तं त्रिकूटकं पूर्वगिरेश्च पृष्ठे तत्रोर्ध्वशक्तिं सुभदां सुसूक्ष्मां ध्यायेद्ब्रह्मसाक्षात्करतरोज्जमम्यं ९ आकाशबीजं हकारः तत्स्मरणपूर्वकं
शिरस्तत्पश्चाद्भूताकाशमात्रं ध्यायेत् एता नव चोदनाः वायुनिग्रहगर्भिताः ततः सूक्ष्मात्परं तमपि कार्यं मनो धारयेत्ततः कारणेन ततो निष्कलेश्नितिसु
एवं द्वादश चोदनाः पूर्वरात्रे प्रागर्धे एकां निद्रां गृहीत्वा पश्चात्पुनर्द्वादश एता एवाभ्यसेदित्यर्थः ११ ११ ११

एवं वायुधारणाद्युपायेन दुर्दांतं मनो निगृह्य प्रशांतेन दांतेन तत्त्वप्रतिपत्तियोग्येन एकांतशीलिना एकाकिना समाधिनेत्यर्थः आत्मनैव न तु शास्त्रादेः आत्म
ज्ञानं यस्य तेन आत्मारामेण बुद्धेन ज्ञाततत्त्वविदा आत्मा योक्तव्यः संधिरर्थः १२ कथं योक्तव्य इत्यत आह पंचानामिति दोषानपास्य स्पृहारूपान् आत्म
पिशाचादिकं च आक्षिप्य निरस्य एतेन प्रत्याहार उक्तः १३ प्रतिभाविशेषं अपवर्गलयं प्रतिसंहारे युक्तिमाह इंद्रियेति १४ बुद्धौ महत्तत्त्वे १५ परिसंख्याय

तत्त्वज्ञः प्रशांतेन दांतेनैकांतशीलिना आत्मारामेण बुद्धेन योक्तव्यात्मानसंशयः १२ पंचानामिंद्रियाणां तु दोषा
नाक्षिप्य पंचधा शब्दं रूपं तथा स्पर्शं रसं गंधं तथैव च १३ प्रतिभामपवर्गं च प्रतिसंहृत्य मैथिल इंद्रियग्राममखिलं म
नस्यभिनिवेशयेत् १४ मनस्तथैवाहंकारे प्रतिष्ठाप्य नराधिप अहंकारं तथा बुद्धौ बुद्धिं च प्रकृतावपि १५ एवं हि परिसं
ख्याय ततो ध्यायेत केवलं विरजस्कमलं नित्यमनंतं शुद्धमव्रणं १६ तस्थुषं पुरुषं नित्यमभेद्यमजरामरं शाश्वतं
चाव्ययं चैव ईशानं ब्रह्म चाव्ययं १७ युक्तस्य तु महाराज लक्षणान्युपधारय लक्षणं तु प्रसादस्य यथा तृप्तः सुखं स्वपे

प्रविलाप्य अलं अत्यर्थं नित्यं नत्वाकाशादिवद्व्यावहारिकनित्यं १६ तस्थुषं तस्थिवांसं स्थाणुं कूटस्थमित्यर्थः नित्यमभेद्यं अत्र तान् दृशग्यां जीवे स्वरूपा
वेन माययाभिद्यमानमप्याकाशवदभेद्यं अव्ययं अनश्वरं यतः अव्ययं ब्रह्म सूक्ष्मं १७ युक्तस्य समाधिस्थस्य सुखं स्वपेदिति सर्वे द्यं लक्षणं १८

544

१९ पाषाणइवेतिपरस्तंवेषं २१ युक्तस्यलक्षणान्युक्त्वायुंजनिरसाह तैलेति गृहसंख्यातरंएकाग्रमनसः लक्षणमितिशेषः २३ स्थिरत्वात्बहिर्मुखत्व

निर्वातेतुयथादीपोह्यचलोदेहसमन्वितः निश्चलोर्ध्वशिखस्तद्वद्युक्तमाहुर्मनीषिणः १९ पाषाणस्त्वमेघोत्थैर्यथाबिंदुभिराहतः
नालंचालयितुंशक्यस्तथायुक्तस्सतस्मृतः २० शंखदुंदुभिनिर्घोषैर्विविधैर्गीतवादितैः क्रियमाणैर्नकंपेतयुक्तस्सैवनिदर्श
नं २१ तैलपात्रंयथापूर्णंकराभ्यांगृह्यपूरुषः सोपानमारुहेद्भीतस्तर्ज्यमानोसिपाणिभिः २२ संयतात्माभयात्तेषांनपा
त्राद्बिंदुमुत्सृजेत् तथैवोत्तरमागम्य एकाग्रमनसस्तथा २३ स्थिरत्वादिंद्रियाणांतुनिश्चलत्वात्तथैवच एवंयुक्त
स्यतुमुनेर्लक्षणान्युपलक्षयेत् २४ सयुक्तः पश्यतेब्रह्मयत्तत्परममव्ययं महतस्तमसोमध्येस्थितंज्वलनसन्निभं २५
एतेनकेवलंयातित्यक्त्वादेहमसाक्षिकं कालेनमहताराजन्श्रुतिरेषासनातनी २६

निवृत्तेः निश्चलत्वात् चंचरत्वकंपत्वात् २४ महतः महतस्तमसमध्येस्थितंतत्पदार्थं तमसोमध्येस्थितंतत्पदार्थंज्वलनसन्निभंचिन्मात्रंतदुभयनिष्कृष्टं
२५ एतेनदर्शनेनकेवलंमोक्षंदेहस्यागात्माक्षिविद्वत्तानानदृत्तिरस्तीतिभावः २६

योगं कोवक्तमार्य वयं कृतकृत्या इति मन्यामहे मनीषिणः अनुभवसिद्धं योगात्कैवल्यमित्यर्थः तथा च श्रुतिः ऊर्ध्वमूलमवाक्शाखं वृक्षं यो वेद संप्रति न स जातु जन
नः श्रद्दध्यान्मृत्युर्मा मारयेदिति २७ एकचत्वारिंशदधिकशततमः केवलप्राप्तिं राजयोगफलमुक्त्वा हठयोगफलमाह तथैवेत्यादिना अत्र यस्मिन्नाधा

एतद्द्वियोगं योगानां किमस्य योगलक्षणं विज्ञापय तदिमं मन्ये तेक्कतकृत्यामनीषिणः २७ शांतो मोक्षधर्मेषु याज्ञवल्क्यो जन
कलं वादे याज्ञवल्क्य उवाच नैर्थ्यो ऽक्रममाणानुमृग्यवाहितो नप पद्भ्यामुत्क्रममाणस्य वैष्णवं स्थानमुच्यते १ जंघा
भ्यां तु वसून्देवानाप्नुयादिति नः श्रुतं जानुभ्यां च महाभागान्साध्यान्देवानवाप्नुयात् २ पायुनोत्क्रममाणस्य मैत्रं स्थान
मवाप्नुयात् पृथिवीं जघनेनाथ ऊरुभ्यां च प्रजापतिं ३ पार्श्वाभ्यां मरुतो देवान्नासाभ्यामिन्दुमेव च बाहुभ्यामिन्द्रमेवाहुरुरसा ९८
रुद्रमेव च ४ ग्रीवायां तु मुनिश्रेष्ठं नरमाप्नोत्यनुत्तमं विश्वेदेवान्मुखेनाथ दिशः श्रोत्रेण चाप्नुयात् ५ घ्राणेन गंधवहं
नेत्राभ्यामग्निमेव च भ्रूभ्यां चैवाश्विनौ देवौ ललाटेन पितॄनथ ६ ब्रह्माणमाप्नोति विभुं मूर्ध्ना देवाग्रजं तथा एतान्युत्क्र
मणस्थानान्युक्तानि मिथिलेश्वर ७

रे समनस्को वा पुरा मरणात् त्रियते न तस्य धारे वता लोकं न नैवाधा रह्मारं गोक्रम गच्छतीति पद्यह्रकृततात्पर्यं ९ मूर्ध्ना सुषुम्नया नाड्या ब्रह्मरंध्रेण एनत्क्रममुक्ति
स्थानं नामत् तथा च श्रुतिः शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवंतीति ८

मो०
५५५

445

मृत्युं तं निहितं ज्ञात्वा पिहितमाचोदितमाशयेनाह अरिष्टानीति १० प्रकृतेर्विक्रियापत्तिः कार्याणां प्रकृष्यमाणसरातुमित्यादि ११ कृष्णश्यावच्छविर्धूसर

अरिष्टानि प्रवक्ष्यामि विहितानि मनीषिभिः संवत्सरवियोगस्य संभवन्ति शरीरिणः ७ योरुन्धतीं न पश्येत दृष्टपूर्वां कदाच न तथैव ध्रुवमित्याहुः पूर्णेन्दुदीपमेव च ८ खण्डाभासं दक्षिणतस्तेपि संवत्सरायुषः परचक्षुषि चात्मानं ये न पश्यन्ति पार्थिव ९ आत्मच्छायाकृतीभूतं तेपि संवत्सरायुषः अतिद्युतिरतिप्रज्ञा अप्रज्ञा चाद्युतिस्तथा १० प्रकृतेर्विक्रियापत्तिः षण्मासान्मृत्युलक्षणं दैवतान्यवजानाति ब्राह्मणैश्च विरुध्यते ११ कृष्णश्यावच्छविच्छायः षण्मासान्मृत्युलक्षणः १२ जीर्णनाभिर्यथा चक्रं छिद्रं सोमं प्रपश्यति तथैव च सहस्रांशुं सप्तरात्रेण मृत्युभाक् १३ शवगन्धमुपाघ्राति सुरभिं प्राप्य यो नरः देवतायतनस्थस्तु सप्तरात्रेण मृत्युभाक् १४ कर्णनासावनमनं दन्तदृष्टिविरागिता संज्ञालोपो निरूष्मत्वं सद्यो मृत्युनिदर्शनं १५ अकस्मादेव सव्येक्षि ग्रवाममनिशं नराधिप मूर्द्धतो धोपतेद्धूमः सद्यो मृत्युनिदर्शनं १६ एतावन्ति त्वरिष्टानि विदित्वा मानवोत्मवान् निशि चाहनि चात्मानं योजयेत्परमात्मनि १७

आत्मच्छायापत्तिर्मरणचिह्नं १२ छिद्रं छिद्रवन्तं १३ सुरभिद्रव्ये शवगन्धग्रहसमर्थः १६ अहरिष्टज्ञानफलमाह एतावन्तीति १७

रम०
५५५

योगिनो मरणास्मरणे तत्पर्यंतं नास्तीत्याह प्रतीक्षमाण इति मृत्युमपि नेच्छेदिमां च स्मारणां क्रियां स्थातुं कर्त्तुमिच्छेदिमाहार्थेति १८ सर्वांकर्णितास्पृथिव्यादितत्वयाद्धंमा
दित्सपो भवतीति पंचभूतजयात्मनस्तुं जयतीत्यर्थः तथाच श्रुतिः पृथ्व्याप्यतेजोनिलखे समुत्थिते पंचात्मके योगगुणे प्रवृत्ते न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगा
ग्निमयं शरीरमिति १९ सांख्ययोगयोर्मुख्यं फलमाह सतामिति सांख्यं च धारणां चेति योगं च ज्ञात्वा ते ताभ्यां सम्यक्चित्ताभ्यां सहितं यथा शास्त्रं यथाविदित्वात्मानमृ

प्रतीक्षमाणस्तत्कालं यत्कालं प्रेतनामभवेत् अथवास्य नेष्टं मरणं स्थातुमिच्छेदिमां क्रियां १८ सर्वगंधान्रसांश्चैव धारयेत
नराधिप १९ सतां त्वधारणां चैव विदित्वात्मा नरर्षभ जयेन्मृत्युं योगेन तत्परेणांतरात्मना २० गच्छेत्प्राप्या
क्षयं कृत्स्नमजन्म शिवमव्ययं शाश्वतं स्थानमचलं दुःप्रापमकृतात्मभिः २१ शांतो मोक्षधर्मेषु याज्ञवल्क्यजनक
संवादे याज्ञवल्क्यवाक्य अव्यक्तस्थं परं यत्तत्पृष्टस्तेहं नराधिप परं गुह्यमिमं प्रश्नं शृणुष्वावहितो नृप १

संसारं २० गच्छेदिति अक्षयं च अविनाशिन्यक्षयं च अपचयशून्यं अचलं च अपरिणामि प्रकृतेरन्यदित्यर्थः २१ शांतो पीठिकाद्वचत्वारिंशः अव्यक्तेत्यनप्रकृतेरन्
तं ब्रह्मणः प्रतिपादयितुं चारभते अव्यक्तस्थमिति अव्यक्तमव्याकृतं मायाशबलं ह्यादीकाशाइति पर्याया त्रिगुणात्मकस्य कारणस्य ब्रह्मणो वा
चकाः चक्रेनाभिरिव स्थितेति प्रयोगदर्शनात्तत्र विशिष्टेनिकृष्टं चक्रनाभिन्यायेन स्थितं वस्तु अव्यक्तस्थं किमव्यक्तं परं ब्रह्म तस्मादपरं तत्किमि
ति पृष्टस्तेषामाह १

निष्कलब्रह्मविद्याया दौर्लभ्यं गोप्यत्वं देवताप्रसादप्राप्यत्वं च दर्शयितुं आख्यायिकामाह यथार्षेणेत्यादिना आदित्तानीमानि मुक्तानि यजूंषि वाजसनेयेन
याज्ञवल्क्येनाख्यायन्त इति स्मृतेः आदित्यप्रसादात्पंचदशशाखाः शुक्लयजुर्मम वचनमतं तपःश्रममापि गृहं च निष्कलब्रह्मकथनं न भूदित्याख्यायिकातात्पर्यं १

यथार्षेणेह विधिना चरतावनतेन ह मयादित्यादवाप्तानि यजूंषि मिथिलाधिप २ महता तपसा देवस्तपिष्ठः सेवितो मया
प्रीतेन चाहं विभुना सूर्येणोक्तस्तदानघ ३ वरं वृणीष्व विप्रर्षे यदिष्टं ते सुदुर्लभं तं ते दास्यामि प्रीतात्मा मत्प्रसादो हि
दुर्लभः ४ ततः प्रणम्य शिरसा मयोक्तस्तपतां वरः यजूंषि नोपयुक्तानि क्षिप्रमिच्छामि वेदितुं ५ ततो मां भगवा
नाह वितरिष्यामि ते द्विज सरस्वतीह वाग्भूता शरीरं ते प्रवेक्ष्यति ६ ततो मामाह भगवानास्यं स्वं विवृतं कुरु विवृतं च
ततो मेऽस्यं प्रविष्टा च सरस्वती ७ ततो विदह्यमानोऽहं प्रविष्टोऽम्भस्तदानघ अविज्ञानादमर्षाच्च भास्करस्य महात्मनः ८
ततो विदह्यमानं मामुवाच भगवान्रविः मुहूर्तं सह्यतां दाहस्ततः शीतीभविष्यसि ९ शीतीभूतं च मां दृष्ट्वा भगवा
नाह भास्करः प्रतिष्ठास्यति ते वेदः सखिलः सोत्तरो द्विज १०

मेऽस्यं मन्ध्यास्यं सुधिराख्यः ८ शीतीभविष्यसि त्वं देह इति शेषः ९ खिलं परिशिष्टं पंचदशशाखापाठमपेक्ष्य बहुशाखासु पठ्यते तत्खिलमित्युच्यते यथा बह्वृचा
नां हिरण्यवर्णां हरिणीमिति श्रीसूक्तं सखिलं तत्सहितं सोत्तरं सोपनिषत्कं १०

त्वपुनर्भवविमोक्षे १५ चक्रेकर्त्तुंप्रयोगः स्वयमेवाविरभूदित्यर्थः १६ मातुलस्यवैशंपायनस्य १८ मिथस्तइतिदेवलस्यमातुलपक्षीयसमिद्धनः पश्यनः पुरस्ता

कृत्वं शतपथं चैव प्रणेष्यामि द्विजर्षभ तस्यांतेवापुनर्भावं बुद्धिस्त्वमविप्स्यति ११ शास्त्रसेवयदिष्टं तत्स्तांस्त्वयोगेश्विनं परं ९
तावदुक्त्वा भगवानस्तमेवाभ्यवर्त्तत १२ ततोनपयाहूतं कृत्वागतेदेविभावसौ गहमागमत्संहृष्टोविंतयवैसरस्वतीं १३
ततः प्रवृत्ताति शुभा स्वरव्यंजनभूषिता ॐकारमादितः कृत्वा ममदेवीसरस्वती १४ ततोहमर्घ्यंविधिवत्सरस्वत्यैन्यवेद
यं तपरोयंचवरिष्ठायनिषण्णस्तत्परायणः १५ ततः शतपथं कृत्स्नं सरहस्यं ससंग्रहं चक्रेसपरिशेषंवहर्षेणपरमे
णह १६ कृत्वाचाध्ययनंतेषांशिष्याणांशतमुत्तमं विप्रियार्थंसशिष्यस्यमातुलस्यमहात्मनः १७ ततः स
शिष्येणमयासूर्येणेवगभस्तिभिः व्यस्तोयज्ञोमहाराजपितुस्तवमहात्मनः १८ मिषतोदेवलस्यापितनोर्द्धंकृत
वानहं स्ववेदद्क्षिणार्थायविमर्देमातुलेनह १९ सुमंतुनाथपैलेनतथाजैमिनिनाचवै पित्रातेमुनिभिश्चैवततो
हमनुमानितः २० दशपंचवयास्तानियजूंष्यर्कान्मयानघ तथैवरोहमर्षेणपुराणमवधारितं २१

तच्चर्थंचर्थनिमित्तंमातुलादिभिः सहविमर्देसतिसमंविभज्ययाह्यमितिनिर्बंधेसतिदेवलसंमत्याः हंदक्षिणायाश्चर्द्धंकृतवान्लोकृतवानित्यर्थः दक्षि
णार्थायेइतिसंधिरार्षः २१

२२ कर्तुं प्रकटीकर्तुं २४ ब्रह्मण्यं ब्राह्मणजातेर्हितं २५ प्रतिष्ठाप्य संततमभिनिवेशेन विचार्य वर्तनं तत्र निदर्शयति विश्वावसुरित्यादिना २६ पंचविंशतिममिति
ब्रह्मणमननं तु ईक्षापूर्वा आलोचनं चान्वीक्षा मननं तत्प्रधानां आन्वीक्षिकीं चतुर्विंशतितत्त्वाः प्रश्नाः क्षराक्षरप्रभेदेन पंचविंशो प्रश्नावष्टंभेनेत्यर्थः अत्र कृत्स्नं शास्त्रं मायाप
शबलपरं निष्कलो नात्मेवेति पूर्वः पक्षः स एवात्मि मायैव नात्मेति सिद्धांतस्त्वाशयेन विश्वाविश्वमित्यादिः संदर्भः प्रवर्तते अत्र पद्यं एकत्व मन्त्रः ए
कत्वं तिष्ठंतस्तथापि विषयवाक्यानां प्रकारभेदात्तेषां प्रकारांतरपक्षस्थापनं परपक्षदूषणं चेति द्वैधोपक्रोशे मैत्र्येण अवलक्ष्य साधकानि परपक्षदूषणा

बीजमेतत्पुरस्कृत्य देवीं चैव सरस्वतीं सूर्यस्य चानुभावेन प्रवृत्तोहं नराधिप २२ कर्तुं शतपथं वेदमपूर्वं च कृतं मया यथा
भिलषितं मार्गं तथा तच्चोपपादितं २३ शिष्याणामखिलं कृत्स्नमनुज्ञातं ससंग्रहं सर्वे च शिष्याः शुचयो गताः परमह
र्षिताः २४ शाखाः पंचदशेमास्तु विद्या भास्करदेशिताः प्रतिष्ठाप्य यथाकामं वेद्यं तदनुचिंतयन् किमत्र ब्रह्मण्यमृतं किं
च वेद्यमनुत्तमं चिंतयंस्तत्र वागम्य गंधर्वो मामपृच्छत २५ विश्वावसुस्ततो राजन्वेदांतज्ञानकोविदः चतुर्विंशतितोपृच्छ
त्प्रश्नान्वेदस्य पार्थिव २६ पंचविंशतिमं प्रश्नं पप्रच्छान्वीक्षिकीं तदा विश्वाविश्वं तथाश्वाश्वं मित्रं वरुणमेव च २७

नीति द्विप्रकारा गिरश्चतुर्विंशतिरिति ज्ञेयं विश्वाविश्वमिति आत्मेत्येवोपासीत इदं सर्वं यदयमात्मा य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवतीत्याक
तावस्य कारणब्रह्मणा आत्मत्वेनोपासनं विधाय तस्य प्रतिपन्नस्य पुमुपासनफलं च हार्यात्ममेवोक्तं अतः सविशेषं द्वैतमेव नत्वेन हि सर्वस्मादस्य
र्वं वस्त्वीति वक्तुं शक्यं वस्तोयायानापनीरित्यर्थः ननु सत्यं ज्ञानमनंतं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन्निति परमे व्योमन्निति परमव्योमशब्दितेमा
याशबले सत्यादि

शक्तित्वस्य निष्कलस्य कुतस्वरूपायेन मूलमुक्तं कथं शुद्धं नास्तीत्युच्यते इत्यत आह तथाप्याप्यमिति यथा ऽप्यातो ऽमोप्यो ऽरेत ऽसि कुत्रचित्त एवं मा
यायां तस्य शक्तिविवर्त्तस्यापि यिनादृष्ट्नो यो लोनियपुच्यते तदपि न किं चाहे वास्मात्कः शाणातृ यदेष आकाश आनंदो न स्यादिति आकाशानंदयोः
सामानाधिकरण्यात्तेषामानंदस्य मीमांसा भवतीत्यादिना क्रतुत्रयोपाधेः उपनिषद् आनंदमात्रे पर्यवसानं आनंदानंदिनोरभेदाद्भ्रमलक्षण
रूपमिति मायेन वा हेयं आनंदो ब्रह्मणो विद्वानिति तं वंधदर्शनात् अत आनंदादिगुणविशिष्टं एकमेव जगत्कारणं ननु ततो नि
ष्कृष्टं कुंडवदरवदस्य ब्रह्म निष्कलमस्तीति भावः तथा च सर्वे चैव यो जं विश्वैव वर्त्तते न तविश्वः तथाप्येव वास्तिन तत्व स्वरूपतिनन्नमां
डुक्ये एष सर्वेश्वर इत्यादिना तृतीयमानंदमयं निरूप्य ततः परमित्यादिना शिवमद्वैतं चतुर्थं मन्यन्ते इति पृथक्कृतयोर्भेदेनोपप
दनं दृष्टं न एष सर्वेश्वर इत्यादेः तत्रप्येकत्वापित्वात् तथा च विश्वतैजसप्राज्ञभेदेन त्रिविधं जीवमुक्त्वा च तुर्यं ब्रह्मोपदिष्टं एष सर्वे
श्वर इत्यादिना सविज्ञेय इत्यनेन ग्रंथेन तथा च यथाह भ्रान्त्यना एकत्वं पत्रपुष्पफलाद्यात्मना च नानात्वमिति शिष्टं ए
कमेव ब्रह्म तथा च श्रुतिः आपो वा इदं सर्वं विश्वा भूतानीत्युपक्रम्य भूर्भुवः सुवरापओमिति अवास्तव्यस्य जगत्कारणस्य
सौमर्थत्वमाह नतत्तो नमदर्शयन्तीत्यामित्रं वरुणं चेति वरुणशब्देनापः मित्रशब्देन सूर्यः ताभ्यां सगुणनिर्गुणोऽन्यते
तथा च वरुणएवास्ति ननु मित्र इति २७

८३

ननुघटदीपालोकवद्ब्रह्मणोपिमायाशबलात्प्रकाशरूपंज्ञानममनन्तनतयोर्गुणगुणिभावे पुनस्तेइत्याशंक्याहज्ञानंज्ञेयमितिसत्यंज्ञानमनन्तंब्रह्मेतिश्रुतेर्ब्र ह्मानंतंब्रह्मगुणावतणाः अधीहिभगवोब्रह्मेतिश्रुतेः यतोवाइमानिभूतानिजायंतेइत्यादिनाब्रह्मलक्षणमुक्त्वाहतद्विजिज्ञासस्वतद्ब्रह्मेति तस्यैवज्ञेय त्वमुक्तंचततोज्ञानंदेवब्रह्मप्रकाशमात्रंस्वजगज्जन्मादिहेतुत्वायोगात् तस्माज्ज्ञेयाविष्कृष्टंनिष्कलंज्ञानंनास्तिकिंतुज्ञेयमेवास्तिननुएकधाबहुधाचै वदृश्यतेजलचंद्रवदितिस्मृतेः प्रकाशस्यैकस्यैकेनतस्योपाधिमालिन्याज्जीवेषुस्वल्पत्वंउपाधेः स्वच्छत्वादीश्वरेह्यनंतमितिचेत्तोजीवः ज्ञः ईश्वरइतितयोर्वि भागोयुज्यतेचयथाजीवेशयोःस्वज्ञानतारतम्यंघटयोरिवतुल्यगंधतेत्याशंक्याह अज्ञत्वज्ञत्वेतयोः स्वाभाविकेएवनसोपाधिकेप्रमाणाभावात् तस्माच्चके

ज्ञानंज्ञेयंतथाज्ञोज्ञः कर्त्ताचाकर्त्ततातथा सूर्यादिः सूर्यइतिचविद्याविद्येतथैवच २८

वलः प्रकाश्यः पृथगस्ति ननुतदीश्वरतत्ववज्ञः स्वांशज्ञानेपीतिकस्मादीश्वरोजीवादृष्टानुरोधात्सृष्ट्यादिंसर्वमीक्षते अतएवसर्वज्ञः सुखदुःखरूपकनामसंपत्ति नामब्रह्मणोतिसभूमापोवैभूमातन्नुत्वंचयथयत्रान्यत्पश्यतिनद्रल्यंचयथयपस्यतन्मर्त्यमितिचतयोर्भेदः कर्तृत्वाहकर्त्ताचाकर्त्तेति यएवकः भूमानंदःस एवतयाः आलोचनकर्त्तृत्वाकाशाख्यः तथाचश्रुतिः यद्वावकंयदेवखंयदेवखंतदेवकमितिकत्वयोर्भेदम् श्रुतोपसंहरंतिप्राणंचहास्मैतदा काशंचोचुरितिनचप्राणस्यविज्ञानात्मनःहंसप्राणोब्रह्मणोतिवद्रतात्प्रपकोप्यलेनप्रागेवद्रतात्तथाकाशात्मकारणब्रह्ममात्रपरोयंवाक्यसंदर्भइन्मचसीयते न तुसगुणब्रह्मपरेसोपकोशलविद्यानत्रतधुक्तमेवनिर्गुणविद्याधिकारेत्वनया : निर्गुणः सूर्यादिः सूतेविम्बमितितत्सूर्यः मायावीतमन्त्रीतिसूर्यादिः सएवसूर्योपिमायावेशादितितापनीयेश्रूयतेईश्वराया

सत्कारीयइतिमाययाधर्मादेवेतिचेतितस्मादलीश्वरान्पृथक्कनिष्कलइत्याशंक्याह चेतयाः स्पर्शोदः स्पर्शइतिचेतिएकस्मिन्विरो
रोधात्सगुणादन्यत्वेसगुणात्वष्टुत्वंचनयुज्यतेविरोधात्नहिकाष्ठादेरसवह्नेःकाष्ठेपादानत्वंघटते कूर्माङ्गवत्त्रिगुणात्सगुणात्सविभा
वात्तिरोभावाद्येवमवतइतिचेत्ततस्यैवनहिसगुणात्तायतेः क्वाचित्सुसुप्तिसमाधिकालिकतुल्यप्रशंसामात्रपरेतिद्रष्टव्यं
ननुयत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदितिविद्यावस्थायांद्वैतदर्शनंनिषेधतियत्रहिद्वैतमिवभवतितदितरइतरं
रंपश्यतीतिअविद्यावस्थायांद्वैतदर्शनमितिवदंतीकथमुपचारात्तैयात्तस्मादस्तिसगुणात्सद्द्यादद्वयमन्यत्तंजूरगवत्तुनत्वे
स्याद्धेतोदयत्वयाविनिनोक्तदोषइत्याशंक्याह विद्याविद्येइति उपासनेनैवविद्यातरभावोत्राविद्यातत्त्वापिदेहमिवकृत्वं
ब्रह्मांडंस्वरूपादनन्यत्वेनपश्यतीतिनोक्तक्षतिविरोधइतिभावः २८

ननुज्ञातृज्ञानज्ञेयात्मकत्रिपु[illegible]भानमविद्यानन्दभानंवेद्येतिहित्वदाहृतत्त्वमोऽर्थोनतुदुक्तःइत्याशंक्याहवेद्यावेद्यमितिवेद्यविषयाहिविद्यानावेद्यविषयाम
वितुमर्हतितवत्रिपुटघमानेवेद्यविषयत्वमस्तिविद्यायाः वदतोव्याघातात्वेद्यंचब्रह्मैवआत्माद्रष्टव्यः सोन्वेष्टव्यः सविजिज्ञासितव्यइत्यादिश्रुतिभ्यः यद्वावेद्यं
तद्ब्रह्मत्वमतएवछांदोग्येसत्यकामः सत्यसंकल्पआत्मावेद्यत्वेनश्रूयतेयआत्मापहतपाप्माविजरोविमृत्युर्विशोकोविजिघत्सोऽपिपासः सत्यकामःस
त्यसंकल्पः सोन्वेष्टव्यः सविजिज्ञासितव्यायस्तमात्मानमनुविद्यविजानातिसर्वांश्चलोकानाप्नोतिसर्वांश्चकामानितिअप्रियवेद्येन्नेवभवतिनाशमेवा
पीतोभवतीतिमृच्छोमरणाहवयांतेनसुषुप्तंचनिंदितं त्रिपुटाभावात् निर्विकल्पकज्ञानानन्दमुक्तिरितिचेत्तर्हिअपिसुषुप्तौतादृशाः संतीतिअर्थेसाध
नंमुक्तिसमाधौर्भेदापादनंपरिभाषामात्रंअननुभूयमानस्यत्रिपुटाभावस्याभयत्रतुल्यत्वात्वेद्यमेवब्रह्मतत्त्वंवेद्यंनतुवेद्यंचेत्तुच्छमेवभवतिययदिवद

वेद्यावेद्यंतथाणुत्वंचलंचलमेवच अपूर्वमक्षयंक्षय्यमेतत्त्वममतुन्नमम ४९

नात्मत्वात्तुत्वाद्वा आत्माहिब्रह्मज्ञानमात्रःसत्त्वश्चयमात्माब्रह्मसत्यंज्ञानमनंतंब्रह्मेत्यादिश्रुतिशतेभ्यः अतः स्वाभाविकानांदेहादिधर्माणांस्थूलता
दीनांयोगजधर्माणांमिणुत्वादीनांचयमिव्यारिरणंकुर्वाणसेन अस्थूलमनण्वहस्वादिवाक्येभ्यः सर्वदृश्यधर्मशून्यमक्षरंप्रसक्तत्वंप्रतिपन्नयमित्याशंक्याह
अचलंचलमिति द्विविधंहिब्रह्मणोधर्मजातंश्रूयतेः चलंचलंचतत्रापहतपाप्मत्वादिसत्यसंकल्पत्वांनमचलं अणुत्वस्थूलत्वादिकंपत्यसादाद्योगिना
मपिवर्तनेतेनदृश्यानित्यमिति नहिसत्यसंकल्पोपिअणुःस्यामितिध्यायन्स्थूलत्वेनरोद्धुंशक्यः नापिस्थूलःस्यामितिध्यायन्अणुत्वेननहियुग
पत्रदृश्यंसंभवतिपरस्परविरोधात् तस्माद्यथानद्र्यपरिणामादयोवृक्षधर्माएवसुरभित्वमधुरत्वकषायत्वादयः परंपरया

क्षणनाश्यपि पुण्यफलं श्लाघ्यत्वमेव धर्माः ननु ब्रह्मस्सत्यत्वाभ्यहितत्वात्तेषां तथात्मत्वं कुत्सादयोः चलाः ब्रह्मधर्माः स्थूलत्वाणुत्वादयस्त
नेनसमारोपीभूतस्य शर्कराशज्ञातस्य चतत्तद्विशेषो ब्रह्मणि प्रसक्त एव ब्रह्मसौभ्यादीरेव वा प्रयत्नाशात्मैव नतत्र तत्स्य स्वक्तोऽस्त्यर्थः किं च स्वात्मैव
चेद्ब्रह्म तर्हि शास्त्रस्य सैव प्रयोजनिस्साधारो क्षतत्वात्तस्य तद्गुणानामपि ज्ञानेस्थैर्यादीनां सर्वदैवभानापत्तेश्च नहि मणिवुद्ध्यापि स्पृष्टः स्फुलिंगो
न दहतीत्यस्ति अचेतोदेहस्तु ब्रह्मग्रहीतोपि स्वाभाविकं धर्मं प्रकाशयेदेव तस्मात् अयमात्मा ब्रह्मेति ममात्माभक्तस्तेन इत्थं वदुपास्य नार्थश्चैप
चारिकोः भेदइ नाशयेनाहस्त्वपूर्वमिति त्वपास्तः प्रागविज्ञातं उपास्त्यात्तु कोऽस्मिंगमायेन प्राप्तुं शक्यमित्यर्थः ननु उपास्त्यासाध्यस्य मो
क्षस्य कथं नित्यत्वासात् नित्यश्च मोक्षः क्रियासाध्यस्यानित्यत्वं च सर्वसिद्धमित्याशंक्याह स्वस्वरूपं स्वक्षयमिति स्वप्रयोगमपि न च पुनरा
वर्तन इति शास्त्रबलात् स्वयमेव न हि शास्त्रीयेऽर्थे युक्तिः संक्रमते येन क्रियासाध्यत्वादनित्यत्वं मोक्षस्यानुमीयेत नहि मस्त्योभू
नेभ्यः सोमाजप्यः उभूतिभ्यः सर्गोभवन्तो शास्त्राद्दृते किंचिन्मानमस्ति तस्मादेतत्प्रज्ञातं कृतं पश्यद्ध्यपि स्वतन्त्रं संप्रकृतमत्तरं न
हि स्वात्मन्तिकं कैवल्यं पाषाणकल्पनेरात्मवासादनतिरिच्यमानं पुरुषार्थो भवति अपि तु स्वात्यन्तिकं तम संकल्पत्वादिकमेव लो
केऽपि न हि कश्चित्तु सुषुप्तिं पुरुषार्थत्वेनोपैति अपि तु स्त्र्यादिभोगमेव तत्सामान्याद्देहेऽपि पुरुषार्थभूतस्यार्थनिर्णयः कर्तव्यः तस्मा
दयमेकमेवमुख्यं ब्रह्म नतु तत्तोऽन्यद्विकल्पं नाम शून्यकल्पं किंचिदस्तीति सिद्धं २९

अथ वाचोक्षिकासहितायाश्चतुर्विंशतिश्लोकाः अवणानंतरं ३१ घृतमिवेतिपद्मानांक्षतिसारत्वेन गहनत्वमुक्तं ३२ परिशेषं श्रुतेर्वा कशेषभूतं कर्मपद्मामिक्षातं
उपक्रमोपसंहारैकरूप्यादिना तात्पर्यलिंगषट्केन परिभावयामि युक्तिमपि साधकबाधकतर्कबलेनालोडयामि परमाचोक्षिकीं क्षतिदर्शितां युक्तिं ३३ चतुर्थी

अथोक्तश्च महाराजेन राजा गंधर्वसत्तमः दृष्टवाननुपूर्वेण ग्रन्थमर्थेन चोत्तमं ३० मुहूर्तमुष्यतां तावत्यावद्देवं विचिंतये वा ऽपि
सेयंकृत्वा तु तूष्णीं गंधर्वश्चास्थितः ३१ ततोनुचिंतयमहं भूयो देवीं सरस्वतीं मनसा सत्वमेवं श्रोदश्चोत्तमपि वेदूनं ३२
नत्वोपनिषदं चैव परिशेषं च पार्थिव मयापि मनसा तात दृष्टा वाचोक्षिकीं परां ३३ चतुर्थी राजशार्दूल विद्यया सांपराणिकी
उदीरितामया तुभ्यं पंचविंशदधिष्ठिता ३४ अथोक्तस्तु महाराज नृराजा विश्वावसुस्तदा श्रूयतां पद्मानत्मान ग्रन्थं सहस्र
वानिह ३५ विश्वाविश्वेतियद्दृक्षं गंधर्वेणानुदृष्टमपि विश्वाव्यक्तं परं विद्याद्भूतभव्यभयंकरं ३६

अपीवाद्वोदृङ्नीतिं चोपेक्षसांपराणिकीमोक्षायहिताहे राजशार्दूलहे जनक उदीरितानुभ्यं तावि श्वावसुनिकरेख्युक्ते तथा गतग्रन्थेन पंचविंशात् पंचविं
शात् पंचविंशः शारीरः तमधिकृत्य स्थिता ३४ अक्षपद्मानामुत्तराणि वक्तुमुपोद्घातयति अथेति ३५ विश्वेति अव्यक्तमितिच्छेदः भूतभव्यरूपं यतत्भ
यं संसारस्तत्क्षिणोतीति भूतभव्यभयंकरं ३६

३७

ऽविभ्यो निष्कलस्तथेति गौडपादः पापाणिकः आत्मेत्येवोपासीतेत्यत्रोक्तस्वरूपास्यात्मन स्तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोन्यस्मात्सर्वस्मादंतरतरं यदयमा
त्मेति सर्वांतरत्वं श्रेयमिति प्रसंगतस्सत्वं चोक्तं तदस्मस्य च विभ्रुस्सत्योनमात्मनः प्रियं ब्रुवाणं ब्रूयात्प्रियंते रोत्स्यतीति शोकहेतुत्वमुक्तं व्रतः पौर्वापर्यपर्यालो
चनात् दुःखशहित्वात् दम्मोऽविभ्यो निष्कलस्त्वात्मेति सिद्धं इदं सर्वं यदयमात्मेति बाधायां सामानाधिकरण्यं योपस्थापण्यः स्थुमानितिवत् आत्मविदः सार्वा
त्म्यात्क्रिपि बाधकासीनानुभवानुसंधानमात्रमिति यं यदुक्तं यदेष आकाश आनंदो न स्यादिसाकाशानंदयोः सामानाधिकरण्यात्गुणगुणिभावेना

त्रिगुणं गुणकर्तृत्वात् हिरण्मयो निष्कलस्तथा अमृतस्तथैव मिथुनमेवमेवानुह
श्यते अव्यक्तं प्रकृतिं प्राहुः पुरुषेति च निर्गुणं ३७

मदर्शनत्वाह अमृतस्येति मिथुनं अमृतान्मृतस्येति द्वयमित्यर्थः अव्यक्तं ब्रीहि यां प्रकृतिं पुरुषं पुंस्त्वरेतः सिंचं यस्य प्रति बिंबं शाख्यप्रकृतिः सर्वं करोतीति सर्वि
बभूतो मोनिष्कल इत्यर्थः क्वतयेक्त आकाश इति सप्तमीतेन यदि कारणो आनंदो न स्यात् नहि कार्यं सुतरां न स्यादिति आधाराधेयभावश्च कारणानंदयोः स
र्वत्र सूपत इति न गुणगुणिभावेन तयोः संबंधः आनंदं ब्रह्मणो विद्वान्निति षष्ठ्यपि राहोः शिर इतिवदौपचारिको वा बोध्या ब्रह्मण इति पदं ब्रह्मविसर्वाक
र्नेषं ३७

यत्तूक्तं श्रीपोवाइदं सर्वमित्यादिश्रुतेर्वैरूप्यमापद्येतेति नमित्रः माण्डूक्योक्तं सर्वेश्वरत्वादिकमपि तुरीयात्रयप्येवेति तत्राह तथैवेति ब्रह्मैवाहं तात्श्रुतिः कारणमात्रपरा
न तु शुद्धं निषेधतीति न तया माण्डूक्यश्रुतं सर्वेश्वरत्वादिकं तृतीयमानंदमयं प्रक्रम्य श्रूयमाणं चतुर्थं निष्कलपरं तयानेनं शक्यमतो नास्ति वरुणादन्योन्यमित्रत्वमित्यर्थः
३८ यत्तूक्तं प्रकाशमात्रस्य जगज्जन्मादिहेतुत्वं न संभवतीति ज्ञानवदेव ब्रह्मेति तत्राह ज्ञानं तु प्रकृतिमिति यत्राह शं जगज्जन्माद्युपयोगि ज्ञानं तन्मायापाहिति
रूपत्वात्प्रकृतिरेव सत्वधर्मो हि ज्ञानमिति सांख्यप्रसिद्धिः यत्तु तेन ज्ञानेन प्रमाणवृत्तिरूपेण जन्यते तत्प्रमाणफलभूतं प्रमारूपं ज्ञानं वेदांतेषु ज्ञेयमित्युच्यते
यथोक्तं परागर्थप्रमेयेषु या फलत्वेन संमता संवित्सैवेह मेयार्थो वेदांतोक्तिप्रमाणतः इति नन्वेवं यस्य स्वरूपं ज्ञानं निष्कलं सत्यं ज्ञानमित्यादिश्रुतिविषय

३८

नन्वेवमित्रं पुरुषं वारुणं प्रकृतिं तथा ज्ञानं तु प्रकृतिं प्राहुर्ज्ञेयं निष्कलमेव च अयं शब्दत्व स्वपुरुषस्तस्मान्निष्कल
उच्यते ३९ कलस्त्वात्रात्पाः प्रोक्तः कोसौ पुरुष उच्यते तपाख्यप्रकृतिं प्राहुस्तया निष्कलः स्मृतः ४०

इत्यर्थः यत्तूक्तं जीवेश्वरजीवयोः स्वाभाविकं तन्निरस्यति अतेतिज्ञो निष्कलमेव ब्रह्मेत्यर्थः कार्योपाधिरयं जीवः कारणोपाधिरीश्वर इति ब्रह्मणोऽप्युपाधिको
जीवेशभावो स्वरूपेण तेनोपाध्यपगमे तावुभावपि निष्कलमेव ब्रह्मेति भावः ३९ यत्तु आनंदाकाशयोरभेदबोधकं वाक्यमुदाहृतं यद्वावकं तदेव स्वेमिति तन्न
कारणानः सगुणस्य प्रकृतिमात्रमित्याशयेनाह क इति कः आनंदः तयोः अव्यक्तो वक्ष्यमाणः प्रकृती इत्यर्थः यत्तूक्तं अनयाः सूर्यादिः सूर्य इति कूर्मांग
वनिर्गुणात्सगुणस्याविर्भावात्तिरोभावाविति चेन्निर्गुणस्यापि सगुणत्वापत्तिरिति तत्राह तपा निष्कल इति [illegible] निष्कलस्य रज्जुरगवत्सगुणत्वस्या
स्याधिष्ठानत्वमतो न निष्कलत्वव्याघात इत्यर्थः ४०

ननु निष्कलस्य वेद्यत्वं न युज्यते त्रिपुट्यात्मभानादित्युक्तमनन्त्वाह तथैवेति यज्ज्ञानं पुरुषार्थप्रतिबंधकं तद्वेद्यं यदा चर्मवदाकाशं वेष्टयिष्यंति मानवा न दा देवमविज्ञाय
दुः खस्यांतो भविष्यतीति श्रुत्या त्वात्माज्ञानस्य तथात्वादात्मैव वेद्यः प्राधान्येनु परिशेषाद्वेद्यमेव तद्धेदं न च मनोनाशाद्वेति नन्तत्र त्रिपुटीभानप्रसक्तिरित्ति तथा च
श्रुतिः नावश्यमनोनिरोद्धव्यं हृदि यावत्क्षयं गतं एतज्ज्ञानं च ध्यानं च शेषोन्यो ग्रंथविस्तर इति अन्यथा घटादिवदनात्मत्वं जडत्वं स्थौल्यादिमत्त्वं च ब्रह्मणः स्यात् तथा
चत्र्यपमात्मा ब्रह्मविज्ञानमानंदं ब्रह्म च अस्थूलमनण्वह्रस्वमित्यादि श्रुतिविरोधः न स्मृतिबाधकेता सामीप्यचारित्व कुंपुक्तं यद्य व्यपमात्मेत्युपात्तस्यर्थ गोशांता मानावि

तथैवावेद्यमव्यक्तं वेद्यः पुरुष उच्यते ५१

कारणं पश्चाद्रोगस्य गुणासैव घटत्वलक्षणोपासत्वम्बवरणान्विदेहपास्तस्थत्वस्यापि योवायुर्दिशां वत्समवेदेत्यादौ सर्वत्र प्रसिद्धेश्च मा शंकाह तथैवेति यत् त्वाहतं
तद्वेद्यं त्वावरणं च तमसेन मलेन दर्पणादेर्ईशं त्वसमेनो रोगेणाह्लादेश्च पक्षद्वये पिशुलगान्मैव वेद्यो न तत्त्वानात्मानटस्थ ईश्वरो जगुलापत्तीरिति नात्म ब्रह्मणो भे
दो गौणः त्वथा गौणोयमभेदरूपा तिसाध्य इत्यपि न च्छांदोग्य एष हो वे ष्टव्य इति मात्मनिन्त्र वेषणाविधाश्रितस्यावरणस्यानुवादेन एतं ब्रह्मलोकं न विंदंत
नृतेन हि प्रत्यूढा इत्यनृतस्य विधानात् ब्रह्माभिन्नं लोकं ब्रह्मलोकं त्वात्मानं चेतोः नृताज्ञानमात्रापनोदेन ब्रह्म वेद्यमेव न तदुपास्यं त्वव्यक्तं त्ववेद्यं तदुक्ता
ते ५१

यत्नकृतं दृश्यत्वं तेन ज्ञानेन्द्रियादीनां तत्स्थूलत्वादीनां निषेधः विशिष्टे ब्रह्मणि पुंस्त्वं तद्इति तत्राह स्वभावप्रकृतिश्चलः पुरुषइति तयोः परिणामित्वकूटस्थत्वादिकृत
विशेषात्पारमार्थिकतादात्म्यायोगेन ब्रह्मणि प्राकृतानां ज्ञानेन्द्रियस्थौल्यादीनामाध्यासिकतादात्म्येन प्रसक्तानां मुख्यत्वस्यैव निषेधो युक्त इति भावः प्रकृतिर्वि-
क्रियमाणा जगदुत्पादयत्यपि पुरुषस्त्वविक्रियमाण एव कर्तेति स्मृताकार्यः ४२ यद्यपि शास्त्रेष्वात्मा वेद्यमव्यक्तं वेद्यः पुरुषइत्युक्तं तथापि वस्तुस्वभावतः वेद्यम-
व्यक्तं दृश्यत्वात् स्ववेद्यः पुरुषो दृश्यत्वादिति तत्राह तथैवेति यत्तु स्वात्मा वेद्य इत्युक्तं नहि तस्य नित्यापरोक्षतया तज्ज्ञानफलं सार्वज्ञं सर्वस्यैव स्यादिति तत्रा-

चलावृत्तमिति प्रोक्तं तथान्यदपि मे शृणु चलां तु प्रकृतिं प्राहुः कारणं क्षयसर्गयोः आक्षेपसर्गयोः कर्ता निश्चलः पुरुषः
स्मृतः ४२ तथैव वेद्यमव्यक्तमवेद्यः पुरुषस्तथा अज्ञावुभौ ध्रुवौ चैव अक्षय्यौ चाप्युभावपि ४३

ह अज्ञाविति यथा प्रकृतिर्जडत्वात्स्वात्मानं न जानाति एवं निष्कलात्मापि स्वात्मनि वृत्तिविरोधात्स्वात्मानं न जानाति अत उभावप्यज्ञौ आत्मनो नित्यापरोक्ष-
त्वं शास्त्रीनबोधरूपतया न तद्वृत्तिविषयतया यो हि सोपाधी जीवेशो ज्ञातृत्वे यो नावधिकृत्स जीवस्यात्माज्ञानं तत्त्वज्ञानात्सार्वज्ञ्यमिति वाच्यते निष्कलज्ञानस-
तुभावद्भूफलकत्वं यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सह इति श्रूयमाणं नान्तरीयकमिति ज्ञेयं ईशज्ञानस्य च दृशात्वाम्नायेन तत्रोपलक्ष-
णत्वात् तस्मादुपलक्षणं स ईश्वरस्याज्ञानादद्भुतं ब्रह्मेति नापूर्वत्वमाह तित्तज्ञानस्येति भावः ध्रुवौ चानादी अक्षय्यौ परिणामिनित्यत्वाद्ब्रह्मापेक्षया प्रकृ-
तिरपि नित्या पुरुषस्त्वसाध्यत्वादेव नित्य इति ४३

यत्तु साध्योपि मोक्षः शास्त्रबलात्सिद्धो भवतीति तत्राह अज्ञैर्निमित्तो इति द्विष्टमविवक्षितं न यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयत
इति श्रुतायत्कृतकं तदनित्यमिति तर्केणोपगृहीतया कर्मफलं नित्यं दृष्ट्वा तद्यत् हात्मानमनुविद्य व्रजंत्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवतीति
विधीयमानमात्मज्ञानमप्यतनाद् एवं चेत्तत्सकर्मांतः पातित्वाद्यथैव कर्मनिंदा च कर्मरूपस्यात्मसततत्त्वकृष्टविधेयस्याभावात् यद्यपि तद्विपाकमुपासना
परमित्याग्रहः तदाः स य एष संप्रसादोस्माच्छरीरात्समुत्थाय परं ज्योतिरूपं संपद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति तदमृतमभयमेतद्ब्रह्मेति वाक्यं चात्मवि
धापरं श्रेष्ठं संप्रसादः सुषुप्ताभिमानी प्राज्ञः यं प्रकृतमात्रं कोप एष सर्वेश्वर इत्यादिश्रूयते सः परं ज्योतिः शक्तिं निष्कलं त्वं तत्परं पुरुषं ज्ञात्वा त्वेन ऐश्वर्येणाह ए
णा तं पुरुषं तेन एतदेव परं ज्योतिरमनादिरूपमिति क्रमार्थः तेनयत्कर्मफलं तत्कृतं तद्वच्चनित्यमित्यर्थः ४४ एवं चतुर्विंशतात्मप्रश्नः श्रुतिबलेन शश्युस्थित

अज्ञैर्निमित्तावुभौ मार्द्धात्मगतिनिश्चयात् अक्षयत्वाज्जननेच्छजन्मवात्पुर
मपं अक्षयं पुरुषं प्राहुः श्रेयोह्यस्य न विद्यते ४५

स्फुलिंबलेनैवोत्तरं दत्तं इदानीमान्वीक्षिकाकेवलतर्कबलेन पक्षव्यवस्थितस्य तर्कबलेनैवोत्तरं वक्तुमुपक्रमते अक्षयत्वादिति तावहेतुनयत्तु नित्यः स्वर्गोऽपाप्ति
साध्यः पुरुषार्थो न कैवल्यं प्रापापाणाकल्पनेरात्मवादानतिरेकादिति तत्राह यतः प्रजननेः अक्षयत्वात् अजं अत्र च अथ यमात्मारिति योजना एकरूपं नन्नमस्येतिप्र
जनन [illegible] तास्मिन्नुनित्यस्वर्गेस्य क्षोपपंचमी अक्षयत्वं परोक्तं कृत्वा अक्षयात्मा हृयत्वाचार्यास्यच व्यवहारेयत्तु अजं चाकाशादितदेवात्ययं प्राहुः
जायमानस्य घयदेर्थपीहि प्रक्ष्यः तद्दृष्टमेभिमतस्य मोक्षस्यापीत्यर्थः न ह्यागामशतेनापि वक्तुस्वभावो मर्यादितुं शक्यत इतिभावः दृष्टं अपश्यमुवसती
तिपुरुषः तं च अक्षयं प्राहुः ननुपुराम अक्षयत्वं प्रज्ञं तथाच कैवल्यमेव मुक्तिः न तैस्वर्यत्ता रत्नमयस्तत्वेन कार्यत्वेन परतंत्रत्वेन च तस्यापि दुःखरूप
त्वादिति भावः ४५